### (2) स्रग्धरा

Def. म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।
Sch. G. म, र, भ, न, य, य, य (7.7.7).
Ex. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वभूतप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

Ś. 1. 1.

———

*Metres with 22 Syllables in a quarter*

### (आकृति)

### हंसी

Def. मौ गौ नाश्वत्वारो गो गो वसुभुवनयतिरिति भवति हंसी ।
Sch. G. म, म, ग, ग, न, न, न, न, ग, ग
or
म, म, त, न, न, न, स, ग (8. 14).
Ex. सार्धं कान्तेनैकान्तेऽसौ विकचकमलमधु सुरभि पिबन्ती
कामक्रीडाकूतस्फीतप्रमदसरसतरमलघु रसन्ती ।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते पश्य स्वेच्छं सरभसगतिरिह विलसति **हंसी** ॥

———

*Metres with 23 Syllables in a quarter*

### (विकृति)

### अद्रितनया

Def. नजभजभा जभौ लघुगुरू बुधैस्तु गदितेयमद्रितनया ।
Sch. G. न, ज, भ, ज, भ, ज, भ, ल, ग (11. 12).
Ex. खरतरशौर्यपावकशिखापतङ्गनिभमग्नदृप्तदनुजो
जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा ।
भुवनहितावतारचतुरश्चराचरधरोऽवतीर्ण इह हि
क्षितिवलयेऽस्ति कंसशमनस्तवेति तमवोचद**द्रितनया** ॥

———

*Metres with 24 Syllables in a quarter*

### (संकृति)

### तन्वी

Def. भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ।
Sch. G. भ, त, न, स, भ, भ, न, य (5. 7. 12).
Ex. माधव मुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः
कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा ।
पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूनै-
र्निश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति **तन्वी** ॥

———

*Metres with 25 Syllables in a quarter*

### (अतिकृति)

### क्रौञ्चपदा

Def. क्रौञ्चपदा भ्मौ स्भौ नननाः न्गाविषुशरवसुमुनिविरतिरिह भवेत् ।
Sch. G. भ, म, स, भ, न, न, न, न, ग (5. 5. 8. 7).
Ex. क्रौञ्चपदालीचित्रिततीरा मदकलखगकुलकलकलरुचिरा
फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपरवरमसकरी ।
फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकितसुतनुः
पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिमकिरणजा ॥

———

*Metres with 26 Syllables in a quarter*

### (उत्कृति)

### भुजङ्गविजृम्भित

Def. वस्वीशाश्वैश्छेदोपेतं ममतनननयुगरसलगैर्भुजङ्गविजृम्भितम् ।
Sch. G. म, म, त, न, न, न, र, स, ल, ग (8. 11. 7).
Ex. हेलोदञ्चन्न्यञ्चत्पादप्रकटविकटनटनभरो रणत्करतालक-
श्चारुप्रेङ्खच्चूडाबर्हः श्रुतितरलनवकिसलयस्तरङ्गितहारधृक् ।
त्रस्यन्नागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुगं कृतस्तुतिरच्युतः
पायाद् वश्छिन्दन् कालिन्दीह्रदकृतनिजवसति-
बृहद्**भुजङ्गविजृम्भितम्** ॥

### दण्डक

Metres with 27 or more letters in each quarter are designated by the general name दण्डक. The highest number of syllables in a quarter of this species of metre is said to be 999. In each quarter there must be first two *naganas* or six short syllables, and the remaining may be either *ragaṇas* or *yagaṇas*, or all the feet may be *sagaṇas*. The classes of दण्डक usually mentioned are चण्डवृष्टिप्रयात, प्रचितक, मत्तमातङ्गलीलाकर, सिंहविक्रान्त, कुसुमस्तवक, अनङ्गशेखर, संग्राम &c. Māl. 5. 23 is an instance of this last species of Daṇḍaka.

———

## SECTION B

### अर्धसमवृत्त (Half-equal Metres)

### (1) अपरवक्त्र

(Sometimes called वैतालीय)

Def. अयुजि ननरला गुरुः समे
तदपरवक्त्रमिदं नजौ जरौ ।
Sch. G. न, न, र, ल, ग (odd quarter)
न, ज, ज, र (even quarter).
Ex. स्फुटसुमधुरवेणुगीतिभि-
स्त**मपरवक्त्र**मवेत्य माधवम् ।
मृगयुवतिगणैः समं स्थिता
व्रजवनिता धृतचित्तविभ्रमाः ॥